पदार्थानतिवृत्तौ -- यथाशक्ति ।

आनुपूर्व्यमनुक्रमः--अनुज्येष्ठं प्रविशन्तु भवन्तः । [1]ज्येष्ठानुपूर्व्या भवन्तः प्रविशन्तु इत्यर्थः ।

यौगपद्यम् एककालता -- सचक्रं धेहि । युगपच्चक्रं[2] धेहि इत्यर्थः ।

[3]सादृश्यम् [4]तुल्यता । किमर्थमिदमुच्यते, यथार्थ इत्येव [5]सिद्धम्? गुणभूतेऽपि सादृश्ये यथा स्यात्, सदृशः [6]किख्या सकिखि ।

[7]सम्पत्तिः अनुरूप आत्मभावः समृद्धेरन्यः -- सब्रह्म बाभ्रवाणाम् । सक्षत्रं शालङ्कायनानाम् ।

साकल्यम् [8]अशेषता -- सतृणमभ्यवहरति । [9]सबुसम् । न किंचिदभ्यवहार्यं परित्यजति इत्ययमर्थोऽधिकार्थ[10]वचनेन प्रतिपाद्यते ।

अन्तवचने -- अन्तः इति परिग्रहापेक्षया समाप्तिरुच्यते । साग्नि अधीते । [11]सेष्टि सपशुबन्धम् । सपशुबन्धान्तमधीते इत्यर्थः । इयं समाप्ति[12]रसकलेऽप्यध्ययने भवति इति साकल्यात् पृथगुच्यते ॥

## यथाऽसादृश्ये । (७/६६१)

यथा इत्येतदव्ययमसादृश्ये वर्तमानं सुपा [13]सह समस्यते, अव्ययीभावश्च समासो भवति । यथावृद्धं ब्राह्मणानामन्त्रयस्व । ये ये वृद्धाः यथावृद्धम्[14] । [15]यथाध्यापकम् । असादृश्ये इति किम्? यथा देवदत्तः तथा यज्ञदत्तः (म.भा. १.३७९) । यथार्थे [16]यदव्ययम् इति [17]पूर्वेणैव सिद्धे [18]समासे वचनमिदं सादृश्यप्रतिषेधार्थम् ॥

## यावदवधारणे । (८/६६२)

यावत् इत्येत[19]दव्यय[20]मवधारणे वर्तमानं सुपा [21]सह समस्यते, अव्ययीभावश्च समासो भवति । अवधारणम् इयत्तापरिच्छेदः । यावदमत्रं ब्राह्मणानामन्त्रयस्व । यावन्त्यमत्राणि सम्भवन्ति पञ्च षड् वा तावत आमन्त्रयस्व[22] । अवधारणे इति किम्? यावद्दत्तं तावद् भुक्तम् । नावधारयामि [23]कियन् मया भुक्तम् इति ॥

## सुप् प्रतिना मात्रार्थे । (९/६६३)

मात्रा [24]बिन्दुः, स्तोकम्, अल्पम् इति पर्यायाः । मात्रार्थे वर्तमानेन प्रतिना सह सुबन्तं समस्यते, अव्ययीभावश्च समासो भवति । अस्त्यत्र किञ्चित् शाकम् शाकप्रति । [25]सूपप्रति[26] । मात्रार्थे इति किम्? वृक्षं प्रति विद्योतते [27]विद्युत् । सुप् इति वर्तमाने पुनः सुब्ग्रहणमव्यय[28]निवृत्त्यर्थम् ॥

---

1. ज्येष्ठानुपूर्व्येण क.ह. 2. चक्रे ड. 3. सादृश्ये क. 4. तुल्यकालता ह. 5. सिद्धे क. 6. सख्या ससखि ब.ह. 7. संपत्तौ क. 8. अशेषाभिधानम् क. 9. सबुसम् नास्ति ह. 10. °वचनमनेन क, °वचने इ. 11. इष्टचन्तमधीते इत्यधिकम् ह. 12. असाकल्येऽपि ह. 13. सह नास्ति फ. 14. यथाभिरूपम् इत्यधिकम् क.इ.ह, यथावृद्धम् नास्ति ब. 15. यथाध्यापकानि फ. 16. यत् नास्ति क.ड. 17. पूर्वेण च क. 18. समासवचनम् ब. 19. अव्ययं नास्ति फ. 20. अवधारणार्थे क. 21. सह नास्ति फ. 22. इत्यर्थः इत्यधिकम् ड. 23. कियद् दत्तं त्वया अ. 24. बिन्दुः नास्ति क.इ.फ.ह. 25. अस्ति अत्र किंचित् सूपः इत्यधिकम् क.ह. 26. लवणप्रति इत्यधिकम् क. 27. विद्युत् नास्ति फ. 28. °निवृत्त्यर्थः फ.